# परमदेवी-सूक्तम्
# paramadevī-sūktam

ॐ अस्य श्रीपरदेवतासूक्तमालामन्त्रस्य मार्कण्डेय सुमेधादि-ऋषयः,
गायत्र्यादिनानाविधानि च्छन्दांसि, त्रिशक्तिरूपिणी चण्डिका देवता, ऐं
बीजं सौः शक्ति क्लीं कीलकं चतुर्विधपुरुषार्थसिद्धयर्थे जपे विनियोगः ।
Oṁ asya śrīparadevatāsūktamālāmantrasya mārkaṇḍeyā sumedhādi-ṛṣayaḥ, gāyatryādinānāvidhāni cchandāṁsi, triśaktirūpiṇī caṇḍikā devatā, aiṁ bījaṁ sauḥ śakti klīṁ kīlakaṁ caturvidhapuruṣārthasiddhayarthe jape viniyogaḥ |

ॐ योगाढ्यामरकायनिर्गतमहत्तेजः समुत्पत्तिनी
भास्वत्पूर्णशशांकचारुवदना नीलोल्लसद्भ्रूलता ॥
गौरोत्तुंगकुचद्वया तदुपरि स्फूर्जप्रभामण्डला
बन्धूकारुणकायकान्तिवताच्छ्रीचण्डिका सर्वतः ॥
oṁ yogāḍhyāmarakāyanirgatamahattejaḥ samutpanī
bhāsvatpūrṇaśaśāṁkacāruvadanā nīlollasadbhrūlatā ||
gaurottuṁgakucadvayā tadupari sphūrjaprabhāmaṇḍalā
bandhūkāruṇakāyakāntivatācchrīcaṇḍikā sarvataḥ ||

ॐ ऐं ह्रीं श्रीं ह्स्फ्रें ह्सौं ह्सौः जय जय महालक्ष्मि जगदाधारवीजे सुरा-
सुरत्रिभुवननिधाने दयाङ्कुरे सर्वतेजोरूपिणि महामहामहिमे
महामहारूपिणि महामहामाये महामायास्वरूपिणि विरिञ्चसंस्तुते विधिवरदे
चिदानन्दे (विद्यानन्दे) विष्णुदेहावृते महामोहमोहिनि मधुकैटभजिघांसिनि

नित्यवरदानतत्परे महासुधाब्धिवासिनि महामहत्तेजोधारिणि सर्वाधारे सर्वकारणकारणे अचिन्त्यरूपे इन्द्रादिनिखिलनिर्जरसेविते सामगानगायिनि पूर्णोदयकारिणि विजये जयन्ति अपराजिते सर्वसुन्दरि रक्तांशुके सूर्यकोटिसंकाशे चन्द्रकोटिसुशीतले अग्निकोटिदहनशीले यमकोटिक्रूरे वायुकोटिवहनसुशीले ओंकारनादचिद्रूपे निगमागममार्गदायिनि महिषासुर-निर्दलनि धूम्रलोचनवधपरायणे चण्डमुण्डादिशिरश्छेदिनि रक्तवीजादिरुधिरशोषिणि रक्तपानप्रिये महायोगिनि भूतवेताल भैरवादितुष्टिविधायिनि शुम्भनिशुम्भशिरश्छेदिनि निखिलासुरबलखादिनि त्रिदशराज्यदायिनि सर्वस्त्रीरत्नरूपिणि दिव्यदेहे निर्गुणे सदसद्रूपधारिणि स्कन्दवरदे (सुरवरदे) भक्तत्राणतत्परे वरवरदे सहस्त्रारे दशशताक्षरे अयुताक्षरे सप्तकोटिचामुण्डारूपिणि नवकोटिकात्यायनिरूपिणि अनेकशक्त्या लक्ष्यालक्ष्यस्वरूपे इन्द्राणि ब्रह्माणि रुद्राणि कौमारि वैष्णवि वाराहि शिवदूति इशानि भीमे भ्रामरि नारसिंहि त्रयस्त्रिंशत्कोटिदैवते अनन्तकोटिब्रह्माण्डनायिके चतुरशीतिलक्षमुनिजनसंस्तुते सप्तकोटिमन्त्रस्वरूपे महाकालरात्रिप्रकाशे कलाकाष्ठादिरूपिणि चतुर्दशभुवनाविर्भावकारिणि गरुडगामिनि क्रौङ्कारह्रौङ्कार ह्रींकार-श्रींङ्कार-क्षोङ्कार-जूङ्करा-सौङ्कार-ऐंङ्कार-क्लीङ्कार-ह्क्लीङ्कार-ह्क्लाङ्कार-हौङ्कार-नानाबीज-मन्त्रराजबिराजितसकलसुन्दरीगणसेवितचरणारविन्दे श्रीमहारात्रित्रिपुरसुन्दरि-कामेशदयिते करुणारसकल्लोलिनि कल्पवृक्षाधः स्थिते चिन्तामणिद्वीपावस्थितमणिमन्दिरनिवासे चापिनि खड्गिनि चक्रिणि गदिनि शङ्खिनि पद्मिनि निखिलभैरवाराधिते समस्तयोगिनीचक्रपरिवृते कालि कंकालि तारे तोतुले सुतारे ज्वालामुखि छिन्नमस्तके भुवनेश्वरि त्रिपुरे त्रिलोकजननि विष्णुवक्षःस्थलालङ्कारिणि अजिते अमिते अपराजिते अनौपमचरिते गर्भवासादिदुःखापहारिणि मुक्तिक्षेत्राधिष्ठायिनि शिवे शान्ति

कुमारि देवि देवीसूक्तसंस्तुते महाकालि महालक्ष्मि महासरस्वति त्रयीविग्रहे प्रसीद प्रसीद सर्वमनोरथान् पूरय पूरय सर्वारिष्टविघ्नांश्छेदय छेदय सर्वग्रहपीडाज्वरोग्रभयः विध्वंसय विध्वंसय सद्यस्त्रिभुवन जीवजातं वशमानय वशमानय मोक्षमार्गं दर्शय दर्शय ज्ञानमार्गं प्रकाशय प्रकाशय अज्ञानतमो निरसय निरसय धनधान्याभिवृद्धिं कुरु कुरु सर्वकल्याणानि कल्पय कल्पय मां रक्ष रक्ष मम वज्रशरीरं साधय साधय ऐं ह्रीं क्लीं चामुण्डायै विच्चे स्वाहा नमस्ते नमस्ते समस्ते स्वाहा ।

oṁ aiṁ hrīṁ śrīṁ hkhpheṁ hsauṁ hsauḥ jaya jaya mahālakṣmi jagadādhāravīje surā-suratribhuvananidhāne dayāṅkure sarvatejorūpiṇi mahāmahāmahime mahāmahārūpiṇi mahāmahāmāye mahāmāyāsvarūpiṇi viriñcasaṁstute vidhivarade cidānande (vidyānande) viṣṇudehāvṛte mahāmohamohini madhukaiṭabhajighāṁsini nityavaradānatatpare mahāsudhābdhivāsini mahāmahattejodhāriṇi sarvādhāre sarvakāraṇakāraṇe acintyarūpe indrādinikhilanirjarasevite sāmagānagāyini pūrṇodayakāriṇi vijaye jayanti aparājite sarvasundari raktāṁśuke sūryakoṭisaṁkāśe candrakoṭisuśītale agnikoṭidahanaśīle yamakoṭikrūre vāyukoṭivahansuśīle oṁkāranādacidrūpe nigamāgamamārgadāyini mahiṣāsura-nirdalani dhūmralocanavadhaparāyaṇe caṇḍāmuṇḍādiśirāśchedini rāktabījādirudhiraśoṣiṇi raktapānapriye mahāyogini bhūtavetāla bhairavāditusṭividhāyini śumbhaniśumbhaśiraśchedini nikhilā surabalakhādini tridaśarājyadāyini sarvastrīratnarūpiṇi divyadehe nirguṇe sadasadrūpadhāriṇi skāndavarade (suravarade) bhaktatrāṇatatpare varavarade sahastrāre daśaśatākṣare ayutākṣre saptakoṭicāmuṇḍārūpiṇi navakoṭikātyāyanirūpiṇi anekaśaktyā lakṣyālākṣyāsvarūpe indrāṇi brāhmāṇi rudrāṇi kaumāri vaiṣṇavi vārāhi śivadūti iśāni

bhīme bhrāmari nārasiṁhi trayastriṁśatkoṭidaivate anantakoṭibrahmāṇḍānāyike caturaśītilakṣamunijanasaṁstute saptakoṭimantrasvarūpe mahākālarātriprakāśe kalākāṣṭhādirūpiṇi caturdaśabhuvanāvirbhāvakāriṇi garuḍagāmini krauṅkāra hrauṅkāra hrīṁkāra-śrīṁkāra-kṣoṅkārā-jūṅkarā-sauṅkāra-aiṁkāra-klīṅkāra-hklīṅkāra-hklāṅkāra-hauṅkāra-nānābīja-mantrarājavirājitasakala-sundrīgaṇasevitacaraṇāravinde śrīmahārātritripursundari-kāmeśdayite karuṇārasakallolini kalpavṛkṣādhaḥsthite cintāmaṇidvīpāvasthitamaṇimandiranivāse cāpini khadgini cakriṇi gadini śaṅkhini padmini nikhilabhairavārādhite samastayoginīcakraparivṛte kāli kāṁkāli tāre totule sutāre jvālāmukhi chinnamastake bhuvaneśvari tripure trilokajanani viṣṇuvakṣaḥsthalālaṅkāriṇi ajite amite aparājite anaupamacarite garbhavāsādiduḥkhāpahāriṇi muktikṣetrādhiṣṭhāyini śive śānti kumāri devi devīsūkta saṁstute mahākāli mahālakṣmi mahāsarasvati trayīvigrahe prasīda prasīda sarvamanorathān pūraya pūraya sarvāriṣṭāvighnāṁśchedaya chedaya sarvagrahapīḍā jvarograbhayaḥ vidhvaṁsaya vidhvaṁsaya sadyastribhuvana jīvajātaṁ vaśamānaya vaśmānaya mokṣamārgaṁ darśaya darśaya jñānamārgaṁ prakāśaya prakāśaya ajñānatamo nirasaya nirasaya dhanadhānyābhivṛddhiṁ kuru kuru sarvakalyāṇāni kalpaya kalpaya māṁ rakṣa rakṣa mama vajraśarīraṁ sādhaya sādhaya aiṁ hrīṁ klīṁ cāmuṇḍāyai vicce svāhā namaste namaste namaste svāhā |

परं देव्या इदं सूक्तं यः पठेत्प्रयतो नरः ।
सर्वसिद्धिमवाप्नोति सर्वत्र विजयी भवेत् ॥१॥
paraṁ devyā idaṁ sūktaṁ yaḥ paṭhetprayto naraḥ |
sarvasiddhimavāpnoti sarvatra vijayī bhavet ||1||

संग्रामेषु जयेच्छत्रून् मतङ्गानिव केसरी ।
वशयेन्निखिलान्लोकान् विशेषेण महीपतीन् ॥२॥
saṁgrāmeṣu jayecchatrūn mataṅgāniva kesarī |
vaśayennikhilānlokān viśeṣeṇa mahīptīn ||2||

त्रिकालं च पठेन्नित्यं देव्याः सूक्तमिदं परम् ।
तस्य विघ्नाः प्रलीयन्ते ग्रहपीडाश्च दारुणाः ॥३॥
trikālaṁ ca paṭhennityaṁ devyāḥ sūktamidaṁ param |
tasya vighnāḥ pralīyante grahapīḍāśca dāruṇāḥ ||3||

ज्वरादिरोगशमनं परकृत्यानिवारणम् ।
पराभिचारशमनं तीव्रदारिद्र्य नाशनम् ॥४॥
jvarādirogaśamanaṁ parakṛtyānivāraṇam |
parābhicāraśamanaṁ tīvradāridrya nāśanam ||4||

परकल्याणनिलयं देव्याः सन्तोषकारकम् ।
सहस्रावृत्तितो देवि मनोरथसिद्धिदम् ॥५॥
parakalyāṇanilayaṁ devyāḥ santoṣkārakam |
sahasrāvṛttito devi manorathasiddhidam ||5||

द्विसहस्रावृत्तिजपात्सर्वसंकष्टनाशनम् ।
त्रिसहस्रावृत्तितस्तु वशकृद्राजयोषिताम् ॥६॥
dvisahasrāvṛttijapātsarvasaṁkaṣṭanāśanam ।
trisahasrāvṛttitastu vaśakṛdrājayoṣitām ॥6॥

शतत्रयं पठेद्यस्तु वर्षत्रयमतन्द्रितः ।
स पश्येच्चण्डिकां साक्षाद् वरदानकृतोद्यमाम् ॥७॥
śatatrayaṁ paṭhedyastu varṣatrayamatandritaḥ ।
sa paśyeccaṇḍikāṁ sākṣād varadānakṛtodyamām ॥7॥

इदं रहस्यं परमं गोपनीयं प्रयत्नतः ।
न वाच्यं कस्यचिद्देवि निधानमिव सुन्दरि ॥८॥
idaṁ rahasyaṁ paramaṁ gopanīyaṁ prayatnataḥ ।
na vācyaṁ kasyaciddevi nidhānamiva sundari ॥8॥

॥ श्रीजगदम्बार्पणमस्तु ॥
॥ śrījagadambārpaṇamastu ॥

॥ इति परमदेवी-सूक्तम् ॥
॥ iti paramadevī-sūktam ॥